Journal of Advances and Scholarly Researches in Allied Education
Vol. II, Issue II, October-2011, ISSN 2249-4510

# व्याकरणशास्त्रे सिद्धान्तकौमुद्याः अनिवार्यत्वम्

# VYAKARANSHASTREY SIDDHANTKAUMDHA ANIVARYATVAM

**Mrs. Gurude Urmila Babureddy**

Lecturer (Research Scholar), NGBU, Allahabad, U.P.

-----------------------------------------♦-----------------------------------------

**यो वेद वेद वदनं सदनं हि सम्यक् ब्राह्यस्सवेदमपि वेद किमन्यशास्त्रम्।**

**यस्मादतः प्रथममेतदधीत्य विद्वान् शास्त्रान्तरस्य भवति श्रवणेऽधिकारी।।**

इति भास्कराचार्यप्रभृत्याचार्यमुखोद्गीतपथाव्याकरणशास्त्रस्याऽध्ययनन्नितराम- पेक्षितम्। अतोऽत्रप्रयोजनपल्लवनेनालम्। किन्तुतत्सच्छास्त्रज्ञानं केन लघुनोपायेन- स्यादित्यर्थमनेके आचार्य्याः प्रायतन्त। तेषाम्प्रयतनपरम्परायां याकरणसिद्धान्तकौमुदीप्रणेता श्रीमद्भट्टोजिदीक्षितो नूनमतिशेते। तद्ग्रन्थव्याख्यानग्रन्थपरम्परायां प्रौढ़मनोरमाशब्दरत्नलघुशब्देन्दुशेखरबृहच्छब्देन्दु-शेखरबालमनोरमातत्वबोधिनीशिवदत्रीलक्ष्मीटीकाग्रन्थप्रभृतयोरनेके ग्रन्थाराराज्यन्तेऽधुना। एतानाश्रित्य वैयाकरणनिकायेषु शास्त्रार्थचर्चाऽऽपि शोश्रूयते। तत्फलीभूतानिफक्कि-कारत्नमंजूषाप्रभृतिरत्नान्यपि शब्दशास्त्रोज्ज्वलप्रांगणे विलसन्तितराम्।

**'छन्दहीनो न शब्दोऽस्ति, नच्छन्दशब्दवर्णितम्'**

इति न्यायशास्त्रेभरतेनोक्तम्। एवमेव आचार्यआनन्दवर्धनाचार्येण स्वकीयग्रन्थरत्ने ध्वन्यालोके एवमेव प्रातिपादितम्। प्रथमे हि विद्वांसो वैयाकरण..........इति चतुरसवैदुष्यलाभाय व्याकरणसाहित्ययोर्व्याकरणज्ञानमावश्यकतामनुनिशम्यकौमुद्यो स्सम्मेलनं परमावश्यकं मत्वा काव्यात्मकं कौमुद्याः ज्ञानमनिवार्यमितिपरिलक्ष्यैव रघुवीरकवेरपि मतं संगच्छते।

**काव्यं विना व्याकरणं न राजते।**

**नकाव्यमव्याकरणं विराजते।।**

उपर्युक्तपदां सर्वथा चरितार्थ्यमनुभूय सिद्धान्तकौमुदी न केवलं व्याकरणपदार्थनिरूपणे समर्थेतिहेतो श्लोकसिद्धान्तकौमुद्यपि काव्यामाध्यमेन शब्दशास्त्र 'गवेषकाणां' कृते सम्यग्ज्ञानं भवत्विति मनसि निधायैव ग्रन्थमिमं रचयामास। तस्माच्छलोकसिद्धान्तकौमुद्याः परिज्ञानं परमावश्यकम् अन्यथा सर्व विफलमिति तात्पर्य्यम्। तदुक्तं च –

**कौमुदी यदि कण्ठस्था वृथाभाष्ये परिश्रमः।**

**कौमुदी यद्यकण्ठस्था वृथा भाष्ये परिश्रमः।।**

तत्र श्रीमद्भट्टोजिदीक्षितस्य गुरुणाविभाविता प्रकाशाख्यव्याख्या पदपदाथ- र्प्रस्फोरिणी प्रथिता। किन्तु प्रक्रियाकौमुद्यामष्टाध्याय्यामष्टाध्यास्सर्वाणिसूत्राणि न समावेशितानि। इति तन्नैन्यून्यं विभाव्य श्रीमता भट्टोजिदीक्षितेन प्राक्तनसफलव्याकरणग्रन्थातिशायिनी वैयाकरणसिद्धान्तकौमुदी कौमुदीव मनोमोदकारिणी प्राणायि। यद्यपि विषयदृशावैयाकरणसिद्धान्तकौमुद्याः सर्वांगपूर्णवत्वन्न कस्यचिद् वैयाकरणस्याविदितम्, तथापि तस्याः ज्ञानं लघु न शक्यते स्म विधातुमिति परिकल्प्य वरदराजावर्येण मध्यसिद्धान्तकौमुदी ततश्च लघुसिद्धान्तकौमुदी विरचित। व्याकरणाध्ययनं

काठिन्यमनुभूय श्लोकबद्धासिद्धान्तकौमुदी विरचिता। इयं च सरस्वतीभवनग्रन्थ- मालायाश्चतुर्दशोत्तरशतसूनतया सम्फूल्लेयं ललिताश्लोकसिद्धान्तकौमुदी भवत्कराम्बुज- लालिता सम्पूर्णानन्दसंस्कृविश्वविद्यालयेन प्रकाशिता। इह वैयाकरणसिद्धान्तकौमुदी- गतसर्वे विषयाः यद्यपि श्लोकात्मना समुन्मीलिताः सन्ति, तथापि तेषां प्रतिपादनं भट्टिकाव्यकविरहस्यद्वयाश्रयकाव्यकौमुदीकथाकल्लोलिनीत्यादिह शाकाव्यमुखेन नास्ति।

पण्डितप्रवरेण श्रीमतासुरेशझामहोदयेन फक्किकाकान्तारनिबिडां वैयाकरण- सिद्धान्तकौमुदीं श्लोकात्मनाविभाव्य व्याकरणवाङ्मये विषयस्वान्तनिशान्तं कुमुदिनीदलमिव समुत्फुल्लितम्। वस्तुतस्तु सिद्धान्तकौमुद्याः निर्माणनन्तरमेव प्रायस्तद्दीका- भूतानामेवप्रसिद्धिः संजाता। तदेव सिद्धान्तकौमुद्याः शब्दरत्नमनोरमाशब्देन्दुशेखर- परिभाषेन्दुशेखर-बृहन्मंजूषा- लघुमंजूषाद्यनेकग्रन्थानां निर्माणं समपद्यत। यद्याप्येते टीकाग्रन्थाः सिद्धान्तकौमुद्या एव स्पष्टार्थं प्रतिपादनाय विनिर्मिताः। कौमुद्याश्च सर्वथा एतेषां ग्रन्थानां सश्वन्धोऽपेक्ष्यत एव, किन्तु तथा नैव दृश्यते। ते ग्रन्थास्तु पृथक् तिष्ठनत एव स्वीयस्वीयास्तित्वं नीत्वा प्रकाश्यन्ते पाठ्यन्ते च। मूलग्रन्थास्तु सिद्धान्तकौमुदीतः कियत्क्रोश दूरं गत्वा कौमुद्या अनुकम्पयमाना भवन्तः केवलं पुसतकालयशोभामेव वर्धयन्ते। केषांचित् परिगणितानां प्राज्ञानां सविधे तिष्ठन्ति। अतस्तत्तट्टीकाग्रन्थविशष्टज्ञानेन छात्रा वंचिता एव भवन्ति, इति नाप्रत्यक्षमिदानीम्।

अपरं च सिद्धान्तकौमुद्याष्टीकाभूतानां सर्वेषां ग्रन्थानां मूलतोऽप्यधिकाकाठिन्यं वावर्धमानभूत्। ते तु इन्द्रस्य टीका विडौजा। अथवा सूर्यस्य टीका भानु इति लेखकानां लेखनेन शास्त्रीयविषयवस्तुबोधने काठिन्यं प्रियमासीददति। तत एव जटिलक्लिष्ट- पदप्रयोगैर्विषयान् सग्रन्थीन् कृतवन्तः, कठिनग्रन्थलेखनेनैव स्वस्वपाण्डित्यप्रदर्शनं कर्तुमीहांचक्रिरे। इत्थं परिस्थितौ श्रीमतासुरेशझामहोदयेन स्थालीपुलाकन्यायेन सिद्धान्तकौमुद्याविर्षयारपि राजकुमारादिप्रभृतीनां कृते सुलभतया तस्या एनं कथमिति परिप्रश्ने 3 श्लोकसिद्धान्तकौमुद्याः निर्माणं संजातम्। तत्र सिद्धान्तकौमुद्याः विषयान् पल्लवकृत्य किमपि किंचित्स्थलमुदाहरणरूपेण प्रस्तुत्यस्याः कियन्महत्वमिति निम्नलिखितरूपेणप्रस्तूयते। तद्यथा-सिद्धान्तकौमुद्याम् -

हलन्त्यम् (1/3/3) हल् हल् (मा. सू. 14) इति सूत्रेऽन्त्यमित् स्यात्।

श्लोकसिद्धान्तकौमुद्यां च -

उपदेशेषु अन्त्यं हल तदित्संज्ञकमुच्यते, इत्संज्ञस्यवर्णस्य तस्यलोपः सदाभवेत्।

पाणिन्याद्युपदेशेषु इत्संज्ञाऽस्तिप्रतिराया, लोपस्तस्याऽपि विज्ञेयः प्रथमास्वादिप्रत्यये।।

एवमेव 'आदिरन्त्येन सहेतादीनिसूत्राणि अपि समीक्षितानि। अतोऽत्र एतेषां तुलनात्मकं सिद्धान्तकौमुद्याः परिज्ञानं सफलमितिकौमुद्योस्तुलनात्मकं विवेचनं विवेचितम्। तस्मात्कारणात् तच्छास्त्रं कथमलघुतया भवत्वितिमनसि निधायैव सिद्धान्तकौमुद्या परिज्ञाने श्लोकसिद्धान्तकौमुद्याः कियन्महत्त्वमिति सर्वेषां पुरतो विलोक्यते। अतोऽनेन सिद्धान्तकौमुद्यास्सांगोपांगश्लोकसिद्धान्तकौमुद्याः अनिवार्यत्वं प्रतीयते।

पुनरस्माभिस्सिंहावलोकन्यायेन 'सन्धिविषयेऽपि उदाहरणमुदाहृयते। तद्यथा-

**अक्षरद्वयं संयोगं सन्धिं वदति पण्डितः वर्णानाम्मेलनं सन्धिः क्वचिद्वापरिवर्तनम्।**

**सूत्रेदृष्टं पदेनैव अनुबन्धः सकथ्यते इत्संभवेदर्थं यः परित्याज्य गच्छति।।**

**अकः सवर्णेदीर्घोऽस्ति सूत्रं दीर्घविधायकम् विद्यालये रवीन्द्रेच भानूदये च गच्छति।**

**अत्र वर्णात् परस्तादृक् स्वरवर्णौ भविष्यतः तदासमानयोः दीर्घसन्धिकुर्यात् पदादिषु।।**

एवं शकध्वादिगणीयत्वाच्छकन्धु कुलरापदम्। कर्कन्धुश्च मकीषाच मार्तण्डादिश्च सिद्धयति। एवमेवाजन्तपुल्लिंगप्रकरणमादित एवाऽवलोकनीयं सर्वथा नूतनता रोचकतां नयनग्रन्थः प्रोत्साहयति गवेषकाणाम् एवमेव 'कृतद्धितसमासाश्चेति' सूत्रे चकारप्रयोजनं नैव केनाऽपि शाब्दिकेन प्रतिपादितमस्ति एतत्सन्दर्भेशब्दानुशासनविहरण पंचानेन श्लोकसिद्धान्तकौमुद्यां सम्यक् रूपेणोत्तरितम्। तत्र चकारशब्देन

निपाताव्ययसंग्रहस्तेषामपि यथा स्यात् तदर्थं क्रियतेऽत्र च। इत्थं प्रकारेणाजन्तहलन्तसर्वविधशब्दानां व्युत्पत्तिवचनं सकलजनप्रत्ययायसमुल्लिखितं ग्रन्थकृता।

स्त्रीप्रत्ययप्रकरणे 'स्त्रियामित्यधिकार' सूत्रत एवसर्वथा नूतनतामासाद्य लावण्यं पद्ये समुद्धारितम्। स्त्रीत्वविवेचने किन्तावत्स्त्रीत्वं कतिविधं तद्वागुपानत्स्रगित्यादौ कथं स्त्रीत्वमित्यादि विवेचनं प्रखरपाण्डित्यमूलकम्। एवमेव 'बहुकुरुचरा' कटुकावक्ष्यमाणै इत्यादीनां फक्किकानां काव्यमाध्यमेन विशदं विवेचनं ग्रन्थकृता समुल्लिखितम्। स्त्रीप्रत्यये एव शाब्दिकमते जातिनिर्णयोगुणपदविमर्शः सर्वथानूतनसिद्धान्तः समुद्धारितः। अतशब्दशास्त्रोज्ज्वलं श्लोकसिद्धान्तकौमुदीग्रन्थरत्नं निर्माय पण्डितः प्रवरसकलशास्त्र-निष्णात-सामवेदशाब्दिकमनुसन्धित्सूनां विद्वत्प्रवराणां महान्तमुपकारं कृतवान्। एतेषां ग्रन्थानामवबोधने मेधावित्वेन साकं सद्गुरोः बुकालसान्निध्यम्, अतितरां श्रमश्चापेक्षते। नायन्तथायुग इत्यालोच्यपण्डितप्रवरेण श्रीमता सुरेशझामहोदयेन 1980 ख्रीस्ताब्दशके फक्किकाकान्तारनिबिडां वैयाकरणसिद्धान्तकौमुदीं श्लोकात्मा विभाव्यव्याकरणजगतः भृशमुपकारि।

अतोऽभिनवेयं पद्यबद्धश्लोकसिद्धान्तकौमुदीं अधीयमानेभ्योऽध्यापकेभ्यश्च कृते भृशमुपकारिकेयमिति मनसि विभाव्य आचार्य्यवर्यैः (मार्गदर्शकैः) वैयाकरणसिद्धान्त-कौमुदीश्लोकसिद्धान्तकौमुद्योस्तुलनात्मकपरीक्षणेन
सिद्धान्तकौमुद्या सफलं परिज्ञानं सम्भवति। न हि तज्ज्ञानमपितु सफलवैयाकरणोपाधिहेतुः यथा टीकाग्रन्थाः समुपलभ्यन्ते, ते इदानीं साफल्यं प्रति कारणमितिमन्येऽहं सिद्धान्तकौमुद्याः स्थानं वैयाकरणपादैः निर्णीतम् तथैव श्लोकसिद्धान्तकौमुद्याः अपि। अतोऽत्र व्याकरणशास्त्रे यत्र-तत्र स्थलजन्यकाठिन्यनिवारणम् एवमेव आमन्दमति राजकुमारादिप्रभृतीनां छात्राणां कृते इयं कौमुद्योस्तुलनात्मकमध्यनेन। विश्लेषणेन सरलेयं सिद्धान्तकौमुदी एवं च सकलवैयाकरणानामपि कृते अवश्यमेव झटिति दातुं समर्थेति हेतोरनयोस्तुलनाविश्लेषणं कृतम् अन्ते सिद्धान्तकौमुदीस्थतथ्यस्य सांगोपांगस्पष्टज्ञानार्थं श्लोकसिद्धान्तकौमुदी आवश्यकी इति मदीया मतिः। इति शम्।